अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् .......................

| Paper Code |
| --- |
| BC-101 |

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**सहायक पाठ्यक्रमः (सत्रम् : प्रथमम्)**

**संस्कृतम्**

**प्रथमपत्रम्-संस्कृतव्याकरणम् (क)**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम्** : इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। अत्र खण्डद्वयं वर्त्तते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (खण्डः – अ) 55 अङ्काः
## (प्रथमावृत्तिः)

**प्रश्नः1– केषाञ्चित् पञ्चानां पदच्छेदविभक्तिवचनं ज्ञापयन्तु।** (2X5=10)

(क) वृद्धिर्यस्याचामादिस्तद् वृद्धम्। (ख) लिङ्सिचावात्मनेपादेषु।
(ग) नपुंसकमनपुंसकेनैकवच्चाऽस्यान्यतरस्याम् (घ) स्थानिवदादेशोऽनल्विधौ।
(ङ) अर्थवदधातुरप्रत्ययः प्रतिपदिकम् (च) मिदचोऽन्त्यात्परः। (छ) स्वमज्ञातिधनाख्यायाम्।

**प्रश्नः2– केषाञ्चित् पञ्चानां समासं ज्ञापयन्तु।** (2X5=10)

(क) तुल्यास्यप्रयत्नं सवर्णम्। (ख) उदात्तस्वरितपरस्य सन्नतरः। (ग) नोपधात्थफान्ताद्वा।
(घ) अनेकाल्शित् सर्वस्य। (ङ्) सरूपाणामेकशेष एकविभक्तौ। (च) स्थाघ्वोरिच्च।
(छ) तपरस्तत्कालस्य।

**प्रश्नः3– केषाञ्चित् पञ्चानामर्थोदाहरणे ज्ञापनीये।** (3X5=15)

(क) वृद्धो यूना तल्लक्षणश्चेदेव विशेषः (ख) तस्मिन्निति निर्दिष्टे पूर्वस्य।
(ग) एकविभक्ति चापूर्वनिपाते। (घ) न वेति विभाषा।
(ङ) संबद्धौ शाकल्यस्येतावनार्षे। (च) निष्ठा (शीङ् स्विदि मिदिक्ष्विदिधृषः।)
(छ) अचः परस्मिन् पूर्वविधौ ।

**प्रश्नः4– चतुर्णां सिद्धिं कुर्वन्तु।** (5X4=20)

(क) क्वं । (ख) आटिटत् । (ग) आमलकम । (घ) मरीमृजः ।
(ङ) प्रकृत्य । (च) उपास्थित । (छ) त्रापुषम् ।

## (खण्डः – ब) 15 अङ्काः
## (अष्टाध्यायी)

**प्रश्नः1– द्वयोरग्रे दशसूत्रलेखनम् ।** (05X2=10)

(क) रथाद् यत् । (ख) क्त्वा च । (ग) क्याच्छन्दसि । (घ) व्यवहिताश्च ।

**प्रश्नः2– पञ्चाना सूत्राणामध्यायपादसंख्या ज्ञापयन्तु।** (01X05=05)

(क) तौ सत् । (ख) कर्मणि च । (ग) शिल्पम् ।
(घ) अनुदात्तङित आत्मनेपदम्। (ङ) एरुः ।

--------------x--------------